# श्रीरामरक्षास्तोत्रम्

अतसी पुष्पसङ्काशं पीतवास समच्युतम् ।

ध्यात्वा वै पुण्डरीकाक्षं श्रीरामं विष्णुमव्ययम् ॥ १॥

पातुवो हृदयं रामः श्रीकण्ठः कण्ठमेव च ।

नाभिं पातु मखत्राता कटिं मे विश्वरक्षकः ॥ २॥

करौ पातु दाशरथिः पादौ मे विश्वरूपधृक् ।

चक्षुषी पातु वै देव सीतापतिरनुत्तमः ॥ ३॥

शिखां मे पातु विश्वात्मा कर्णौ मे पातु कामदः ।

पार्श्वयोस्तु सुरत्राता कालकोटि दुरासदः ॥ ४॥

अनन्तः सर्वदा पातु शरीरं विश्वनायकः ।

जिह्वां मे पातु पापघ्नो लोकशिक्षाप्रवर्त्तकः ॥ ५॥

राघवः पातु मे दन्तान् केशान् रक्षतु केशवः ।

सक्थिनी पातु मे दत्तविजयोनाम विश्वसृक् ॥ ६॥

एतां रामबलोपेतां रक्षां यो वै पुमान् पठेत् ।

सचिरायुः सुखी विद्वान् लभते दिव्यसम्पदाम् ॥ ७॥

रक्षां करोति भूतेभ्यः सदा रक्षतु वैष्णवी ।

रामेति रामभद्रेति रामचन्द्रेति यः स्मरेत् ॥ ८॥

विमुक्तः स नरः पापान् मुक्तिं प्राप्नोति शाश्वतीम् ।

वसिष्ठेन इदं प्रोक्तं गुरवे विष्णुरूपिणे ॥ ९॥

ततो मे ब्रह्मणः प्राप्तं मयोक्तं नारदं प्रति ।

नारदेन तु भूर्लोके प्रापितं सुजनेष्विह ॥ १०॥

सुप्त्वा वाऽथ गृहेवापि मार्गे गच्छेत एव वा ।

ये पठन्ति नरश्रेष्ठः ते नराः पुण्यभागिनः ॥ ११॥ (ते ज्ञेयाः)

इति श्रीपाद्मेमहापुराणे श्रीरामरक्षास्तोत्रम्